# ८. अर्बुदाद्रिकल्पः ।

अर्हन्तौ प्रणिपत्याहं श्रीम**न्नाभेय-नेमि**नौ । महाद्रे**रर्बुदा**ख्यस्य कल्पं जल्पामि लेशतः ॥ १ ॥
देव्याः श्रीमातुरुत्पत्तिमादौ वक्ष्ये यथाश्रुतम् । [1]तदधिष्ठानतो ह्येष प्रख्यातो भुवि पर्वतः ॥ २ ॥
श्री**रत्नमाल**नगरे राजाभूद् **रत्नशेखरः** । सोऽनपत्यतया दूनः प्रैषीच्छाकुनिकान् बहिः ॥ ३ ॥
शिर[:]स्थां काष्ठभारिण्यास्ते दुर्गां दुर्गतस्त्रियाः । वीक्ष्य व्यजिज्ञपन् राज्ञे भाव्यस्यास्त्वत्पदे सुतः ॥ ४ ॥
राज्ञादिष्टा सगर्भैव सा हन्तुं तन्नरैर्निशि । गर्त्ते क्षिप्ता कायचिन्ताव्याजात्तस्माद्बहिर्निरैत् ॥ ५ ॥
साऽसूत सूनुं भयार्त्ता द्राक् च झाटान्तरेऽमुचत् । गर्त्तं[2] चानीय तद्वृत्तानभिज्ञैस्तैरघाति सा ॥ ६ ॥
पुण्येरितार्भे स्तन्यं चापीपत्सन्ध्याद्वये मृगी । प्रवृद्धेऽसिंष्टङ्कशाला महालक्ष्म्याः पुरोऽन्यदा ॥ ७ ॥
मृग्याश्चतुर्ण्णां पादानामधो नूतननाणकम् । जातं श्रुत्वा शिशुरूपं लोके वार्त्ता व्यजृम्भत[3] ॥ ८ ॥
नव्यो[4] नृपोऽभूत्कोऽपीति श्रुत्वा प्रैषीद् भटान्नृपः । तद्वधायाथ तं दृष्ट्वा सायं ते पुरगोपुरे ॥ ९ ॥
बालहत्याभियाऽमुञ्चन् गोयूथस्यायतः[5] पथि । तत्तथैव स्थितं भाग्यादेकस्तूक्षा पुरोऽभवत् ॥ १० ॥
तत्प्रेर्य स[6] चतुष्पादान्तराले तं शिशुं न्यधात् । तच्छ्रुत्वा मन्त्रिबोधात्तं राजाऽमंस्तौरसं मुदा ॥ ११ ॥
**श्रीपुञ्जा**ख्यः क्रमात्सोऽभूद् भूपस्तस्याऽभवत् सुता । **श्रीमाता** रूपसंपन्ना केवलं प्लवगानना ॥ १२ ॥
तद्वैराग्यान्निर्विषया जातु जातिस्मरा पितुः । न्यवेदयत् प्राग्भवं स्वं यदाऽऽसं वानरी पुरा ॥ १३ ॥
सञ्चरन्त्य**र्बुदं** शाखिशाखां तालुनि केनचित् । विद्धा मृष्यथ रुण्डं मे कुण्डेऽपतत्तरोरधः ॥ १४ ॥
तस्य कामिततीर्थस्य माहात्म्यान्नृतनुर्मम । मस्तकं तु तथैवास्तेऽद्याप्यतः कपिमुख्यहम् ॥ १५ ॥
**श्रीपुञ्जो**[7]ऽक्षेपयच्छीर्षं कुण्डे प्रेष्य निजान्नरान् । ततः सा नृमुखी जज्ञेऽतपस्यच्चा**र्बुदे** गिरौ ॥ १६ ॥
व्योमगाम्यन्यदा योगी दृष्ट्वा तां रूपमोहितः । खादुत्तीर्यालपत् प्रेम्णा—मां कथं वृणुषे शुभे[†] ! ॥ १७ ॥
सोचेऽत्यगादाद्ययामो रात्रेस्तावदतः परम् । ताम्रचूडरुतादर्वाक् कयाचिद्विद्यया यदि ॥ १८ ॥
शैलेऽत्र कुरुषे हृद्याः पद्या[8] द्वादश तर्हि मे । वरः स्या इति, चेटैः स्वैर्द्वियाम्याचीकरत्स ताः ॥ १९ ॥
स्वशक्त्या कुर्कुटरवे कृतके कारिते तया । निषिद्धोऽपि विवाहाय नास्थात्तत्कैतवं विदन् ॥ २० ॥
सरित्तीरेऽथ तं स्वस्रा क्लृप्तवीवाहसम्भृतिम्[9] । सोचे त्रिशूलमुत्सृज्य विवोढुं संनिधेहि मे ॥ २१ ॥
तथा कृत्वोपागतस्य पदयोर्विकृतान् शुनः । नियोज्य साऽस्य शूलेन हृद्यस्तेन[10] वधं व्यधात् ॥ २२ ॥
इत्याजन्माखण्डशीला जन्म नीत्वा स्वराप सा । **श्रीपुञ्जो**ऽशिखरं[11] तत्र तत्प्रासादमचीकरत् ॥ २३ ॥
षण्मासान्तेऽ**र्बुदा**ख्योऽस्याधोभागेऽद्रेश्चलत्यहिः । ततोऽद्रिकम्पस्तत्सर्वे[12] प्रासादाः शिखरं विना ॥ २४ ॥

लौकिकास्त्वाहुः—

‘**नन्दिवर्द्धन** इत्यासीत् प्राक् शैलोऽयं **हिमाद्रिजः** । कालेना**र्बुद**नागाधिष्ठानात्त्व**र्बुद** इत्यभूत्’ ॥ २५ ॥
वसन्ति द्वादश ग्रामा अस्योपरि [13]धनोद्धुराः । तपस्विनो **गोग्गलिका राष्ट्रिका**श्च सहस्रशः ॥ २६ ॥
न स वृक्षो न सा वल्ली न तत् पुष्पं न तत् फलम् । न स कन्दो न सा खानिर्या नैवात्र निरीक्ष्यते ॥ २७ ॥
प्रदीपवन्महौषध्यो जाज्वलन्त्यत्र रात्रिषु । सुरभीणि रसाढ्यानि वनानि[14] द्विविधान्यपि ॥ २८ ॥
स्वच्छन्दोच्छलदच्छोर्म्मिस्तीरद्रुकुसुमाञ्चिता । पिपासुक्लृप्तानन्दाऽत्र भाति **मन्दाकिनी** धुनी ॥ २९ ॥
चकासत्यस्य शिखराण्युत्तुङ्गानि सहस्रशः । परिस्खलन्ति सूर्यस्य येषु रथ्या अपि क्षणम् ॥ ३० ॥

---

1 P यदधि° । 2 Pa गर्भं । 3 C व्यजृम्भते । 4 Pa भव्यो । 5 A C गोयूथः । 6 A C तत्प्रेर्य च स । 7 P विना सर्वत्र ‘श्रीपुञ्ज’ । † P मां वृणीषे कथं शुभे । 8 ‘पद्या’ पतितः Pa । 9 Pb संवृतिम् । 10 P सा स्वशूलेनाहत्य स्वेव वधं । 11 P श्रीपुञ्जः शिखरे । 12 A B Pb °सर्व° । 13 ‘धनो’ पतितः C आदर्शे । 14 ‘वनानि’ पतितः P ।

**चण्डाली-वज्रतैलेभकन्दा**द्याः कन्दजातयः । दृश्यन्तेऽत्र प्रतिपदं तत्तत्कार्यप्रसाधिकाः ॥ ३१ ॥
प्रदेशाः पेशलाः कुण्डैस्तत्तदाश्चर्यकारिभिः । अस्य धातुखनीभिश्च निर्झरैश्चामृतोदकैः ॥ ३२ ॥
कोकूयिते कृतेऽत्रोच्चैर्द्राक् **कोकूयित**कुण्डतः । प्रादुर्भवति वाःपूरः कुर्वन् खलहलारवम् ॥ ३३ ॥
**श्रीमाता-ऽचलेश्वर**श्च **वशिष्ठाश्रम** एव च । अत्रामी लौकिकास्तीर्था **मन्दाकिन्या**दयोऽपि च ॥ ३४ ॥
महाद्रेरस्य नेतारः **परमार**नरेश्वराः । पुरी **चन्द्रावती** तेषां राजधानी निधिः श्रियाम् ॥ ३५ ॥
कलयन् विमलां बुद्धिं **विमलो** दण्डनायकः । चैत्यमत्र**र्षभ**स्याधात् पैत्तलप्रतिमान्वितम् ॥ ३६ ॥
आराध्या**म्बां** भगवतीं पुत्रसंपदपस्पृहः । तीर्थस्थापनमभ्यर्थ्य चम्पकद्रुमसंनिधौ ॥ ३७ ॥
पुष्पस्रग्दामरुचिरं दृष्ट्वा गोमयगोमुखम् । तत्राग्रहीद् भुवं दण्डेट् **श्रीमातु**र्भवनान्तिके ॥ ३८ ॥–युग्मम् ।
राजानकश्री**धान्धूके** क्रुद्धं श्री**गूर्जरेश्वरम्** । प्रसाद्य भक्त्या तं **चित्रकूटा**दानाय्य तद्गिरा ॥ ३९ ॥
**वैक्रमे वसुवस्वाशा ( १०८८ )** मितेऽब्दे भूरिरैव्ययात् । सत्प्रासादं[1] स **विमलवसत्या**ह्वं व्यधापयत् ॥४०॥
यात्रोपनम्रसंघस्यानिम्नविघ्नविघातनम् । कुरुतेऽत्रा**म्बिका** देवी पूजिता बहुभिर्विधैः ॥ ४१ ॥
**युगादिदेव**चैत्यस्य पुरस्तादत्र चाश्मनः । एकरात्रेण घटितः शिल्पिना तुरगोत्तमः ॥ ४२ ॥
**वैक्रमे वसुवस्वर्के ( १२८८ )** मितेऽब्दे **नेमि**मन्दिरम् । निर्ममे **लूणिगवसत्या**ह्वयं सचिवेन्दुना ॥ ४३ ॥
कषोपलमयं बिम्बं श्री**तेजःपाल**मन्त्रिराट् । तत्र न्यास्थत् **स्तम्भतीर्थे** निष्पन्नं दृक्सुधाञ्जनम् ॥ ४४ ॥
मूर्तीः स्वपूर्ववंश्यानां हस्तिशालां च तत्र सः । न्यवीविशद्विशांपत्युः श्री**सोमस्य** निदेशतः ॥ ४५ ॥
अहो ! **शोभनदेव**स्य सूत्रधारशिरोमणेः । तच्चैत्यरचनाशिल्पान्नाम लेभे यथार्थताम् ॥ ४६ ॥
वज्रात्रातः समुद्रेण **मैनाको**ऽस्यानुजो गिरेः । समुद्रौ त्रातौ त्वनेन दण्डेन्मन्त्रीश्वरौ भवात् ॥ ४७ ॥
तीर्थद्वयेऽपि भग्नेऽस्मिन् दैवान्म्लेच्छैः प्रचक्रतुः । अस्योद्धारं द्वौ **शकाब्दे वह्निवेदार्कसंमिते (१२४३)** ॥४८॥
तत्राद्यतीर्थस्योद्धर्त्ता **लल्लो महणसिंह**भूः । **पीथड**स्त्वितरस्याभूद्व्यवहृ**च्चण्डसिंह**जः ॥ ४९ ॥
**कुमारपाल**भूपालश्चौलुक्यकुलचन्द्रमाः । श्री**वीर**चैत्यमस्योच्चैः शिखरे निरमीमपत् ॥ ५० ॥
तत्तत्कौतूहलाकीर्ण्णं तत्तदौषधिबन्धुरम् । धन्याः पश्य**न्त्यर्बुदा**द्रिं नैकतीर्थपवित्रितम् ॥ ५१ ॥
दृब्धः श्रोत्रसुधाकल्पः श्री**जिनप्रभ**सूरिभिः । श्रीम**दर्बुदकल्पो**ऽयं चतुरैः परिचीयताम् ॥ ५२ ॥

॥ **श्रीअर्बुदकल्पः समाप्तः**[†] ॥

॥ ग्रन्थाग्रं ५२ अक्षर १६ ॥

---

1 A C प्रासाद । † P श्रीअर्बुदाचलस्य कल्पः ।